श्यामा” भट्टिः। वर्गश्च एकजातीयसमुदायः “क्रियाकाण्डेषु निष्णातोयोगेषु च कुरूद्वह !” भाग०४,२४,९। “अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा” भाग०८,४,२४। उपचारात् १४तत्प्रतिपादकग्रन्थे च ब्रह्मकाण्डं कर्म्मकाण्डम् अवसरश्चात्र योग्यकालः प्रस्तावश्च तत्र योग्यकाले अकाण्डशब्दे ५२९उदा०। प्रस्तावे अयोध्याकाण्डं लङ्काकाण्डमित्यादि। नालमत्र लतादीनां पत्राधारदण्डः (डाँटा)नालाख्यश्च। तत्र नाले “काण्डमूलपत्रपुष्पफलप्ररोहरसगन्धानां सादृश्येन प्रतिनिधिं कुर्य्यात् सर्वाभावे यवः प्रतिनिधिः” श्रा०त०पैठी०। “काण्डं नालम्” रघु०। “पुच्छकाण्डाद्दक्षिणोऽस्थनि” कात्या० २५,६,५। पुच्छं काण्डमिव नालाकारत्वात्। स्तम्बे “काण्डात् काण्डात् प्ररोहन्तीः” यजु० १३,१४। “महतः पञ्चमूलस्य काण्डमष्टादशाङ्गुलम्” सुश्रु०। स्कन्धे “इक्षुकाण्डानि वा कृष्णसर्पेण दंशयित्वा भक्षयेत्” “दूर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः” सुश्रु० “उद्भिज्जाः स्थावराः सर्वे वीजकाण्डप्ररोहिणः” “वीजकाण्डरुहाण्येव प्रतानावल्ल्य एव च” मनुः। १५ग्रन्थपरिच्छेदे। मधुकाण्डं श्राद्धकाण्डम् १६सन्धिविच्छिन्नैकखण्डास्थ्नि न०। “भग्नं समासात् द्विविधं हुताशकाण्डे च सन्धौ च हि तत्र सन्धौ। उत्पिष्टविश्लिष्टविवर्त्तितञ्च तिर्य्यग्गतं क्षिप्तमधश्च षट् च”। रोगनिश्चयः। “सन्धिविच्छिन्नमेकखण्डमस्थि काण्डम्” तट्टीका। काण्डस्यावयवो विकारो वा बिल्वा० अण्। १७काण्डावयवे १८तद्विकारे च त्रि० १९अङ्कोठवृक्षे पु० शब्दचि०।

**काण्डकटुक** पु० काण्डे स्तम्बेऽपि कटुकस्तिक्तः। कारवेल्ले, (करेला) राजनि०। [स्य कप्। काण्डतृणे राजनि०।

**काण्डकाण्डक** पु० काण्डस्य शरदण्डस्य काण्डमिव काण्ड-

**काण्डकार** पु० काण्डं किरति विस्तीर्णतया कॄ—ण्वुल्। १गुवाकवृक्षे शब्दमा०। कृ—ण्वुल्। २वाणकारके त्रि०।

**काण्डकीलक** पु० काण्डे कीलमिव यस्य कप् समा०। लोध्रवृक्षे राजनि०। तस्मिन् हि कीटसम्बन्धात् कीलमिव स्कन्धे जायते। [दीर्घकाण्डे गुण्डनामतृणे राजनि०।

**काण्डगुण्ड** पु० काण्डेन गुण्डयति गुडि—वेष्टने अण्।

**काण्डगोचर** पु० काण्डस्य बाणस्य गोचर इव गोचरोऽस्य। लोहनाले नाराचाख्ये अस्त्रभेदे त्रिका०।

**काण्डतिक्त** पु० काण्डे तिक्तः। भूनिम्बे (चिराता) राजनि०। स्वार्थे कन्। काण्डतिक्तक तत्रैव।

**काण्डधार** पु० काण्डं धारयत्यत्र धृ—णिच् आधारे अच्। १देशभेदे। स अभिजनोऽस्य तक्षशिला० अञ्। २काण्डधार पित्रादिक्रमेण तत्रवासिनि त्रि०। [राजनि०।

**काण्डनील** च० काण्डे नीलः कीटाकलितत्वात्। लोध्रवृक्षे

**काण्डपट** पु० काण्ड इव पटः। (कानात) पटभेदे, हेमच०। तस्य हि संकोचे काण्डरूपता भवति। “ततः स्वमेवागारमानीय काण्डपटपरिक्षिप्ते विविक्तोद्देशे” दशकु०। स्वार्थे कन्। काण्डपटक तत्रैव। “उत्क्षिप्तकाण्डपटकान्तरलीयमानः” माघः। [शरपुङ्खावृक्षे राजनि०।

**काण्डपुङ्खा** स्त्री काण्डस्य शरस्य पुङ्खो यस्याः ५त०।

**काण्डपुष्पा** स्त्री काण्डात् पुष्पमस्याः “काण्डप्रान्तशतैकेभ्यः पुष्पात्” पा० टाप्। द्रोणवृक्षे शब्दच०। पुष्पे न०।

**काण्डपृष्ठ** न० काण्डं वृक्षस्कन्धइव स्थूलं पृष्ठमस्य। १स्थूलपृष्ठे धनुरादौ। काण्डः पृष्ठेऽस्य। २शस्त्राजीविनि पु०। “स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ!। अजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम्” भा० अनु० २३अ०। “अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च” भा०अनु०१०अ० अपाङ्क्तेयकथने। “चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः” भा०अनु०१२५अ० अभोज्यान्नकथने। पापिनां तिर्य्यग्योनितः काण्डपृष्ठताप्राप्तिश्च क्रमशो यथा भवति तथा भा० अनु० २८अ० निरूपितं यथा “तिर्य्यग्योनिगतः सर्व्वोमानुष्यं यदि गच्छति। स जायते पुक्कशो वा चण्डालो वाऽप्यसंशयः। पुक्कशः पापयोनिर्वा यः कश्चिदिह लक्ष्यते। स तस्यामेव सुचिरं मातङ्गः परिवर्त्तते। ततोदशशते काले लभते शूद्रयोनिताम्। शूद्रयोनावपि ततो बहुशः परिवर्त्तते। ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्त्तते। ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्। ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु द्विशते काले लभते काण्डपृष्ठताम्। काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिशते काले लभते जड़तामपि। ताञ्च प्राप्य चिरं कालं तत्रैव परिवर्त्तते। ततश्चतुःशते काले श्रोत्रियो नाम जायते”। “स्वकुलं पृष्ठतः कृत्वा योवै परकुलं व्रजेत्। तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः” स्मृत्यन्तरोक्तकर्म्मविपाकः काण्डपृष्ठता। ३वेश्यापतौ शब्दकल्पद्रुमः तन्मूलं मृग्यम्।

**काण्डरुहा** स्त्री काण्डात् रोहति रुह—क। (कटकी)